International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2020; 6(1): 125-128
© 2020 IJSR
www.anantaajournal.com
Received: 09-11-2019
Accepted: 13-12-2019

**पि.रविकुमार**
शोधछात्रः आ. नागार्जुन विश्विविद्यालयः गुम्टूर्, आन्ध्र प्रदेश, भारत

**डां. डि. यन्. दीक्षित**
आ. नागार्जुन विश्विविद्यालयः गुम्टूर्, आन्ध्र प्रदेश, भारत

**Corresponding Author:**
**पि.रविकुमारः**
शोधछात्रः आ. नागार्जुन विश्विविद्यालयः गुम्टूर्, आन्ध्र प्रदेश, भारत

# श्रीविष्णु महापुराणे कलिधर्म निरूपणम्

**पि.रविकुमार, डां. डि. यन्. दीक्षित**

**प्रस्तावना**

वेदवाङ्गमयमिव पौराणिक साहित्यमपि भारतीय संस्कृतेः प्राच्यधर्म परम्परायाश्च ज्ञानाय परमोपदेयत्वमुपकल्पते । पुराणिना पुरातन विषयप्रतिपादकानि प्राच्य विधानाञ्च कोशरूपाणि । वेदानामात्मस्वरूपत्वेन अङ्गीक्रियते । आत्मा पुराणानां वेदानाम् इति वचनप्रामाण्यात् । यत्र पुराणेषु भूगोलेतिहासविधिविज्ञानादाय आधुनिक विषयाः सूक्ष्मतया दुरीदृश्यन्ते । तत्र कथाख्याधिका देव-माहात्म्य व्रतनियम धर्मशास्त्र तीर्थ माहात्म्य सृष्टि प्रलयराजवंश मन्वन्तर वंशानुचरितानि सुष्टुतया प्रतिपादितानि सन्ति । अपि च व्याकरणछन्दः काव्यनाट्यालङ्कारायुर्वेदानीति ज्योतिष कर्मकाण्ड विविध दर्शन विषयाः पुराणेषु प्रचुरतया वर्तन्ते । एतस्मादेव उक्तं यत् "पुराणविद् सर्वविद् भवति" इति । पुराणादृते न कश्चित् अन्यो विषयः प्रवर्तते । वेदज्ञानमपि पुराणज्ञानेन विना न पोपुष्यते । वेदार्थकस्य सम्यक् ज्ञानाय पौराणिक साहित्यं नितरांमपेक्ष्यते । वेदस्य गूढार्थपरिज्ञानं पुराणाध्ययनात् विना न भवितुमर्हति । "इतिहास पुराणाभ्यां वेदं समुपबृंह्येत् " इति कथनात् वेदोपबृंहणं पौराणिक साहित्येन विहितम् ।

**पुराणशब्दस्य व्युत्पत्तिः**

"पुरा भवं पुराणम् "इत्यर्थे पुरा इत्यव्ययशब्दात् "साचंचिरं प्राह्णेप्रगेइव्ययेभ्यष्ट्युट् युला तुट् च" इति (अष्टाध्यायी 4—6—23) सूत्रात् ट्युप्रत्ययान्तरं इत् संज्ञस्य टकारस्य लोपे कृते युवोरजाकौ इति सूत्रेण योरनादेशे च विहिते तुडागमाच्च पुरातन इति शब्दो निष्पन्नो भवति ।

**पुराणस्य लक्षणम् ---** लोके केश्चित् पुराणानां वर्ण्यविषये यद्यपि पञ्चभिर्दशभिर्वा लक्षणानि उक्तानि । तथापि पुराणानां पञ्च लक्षणानि विद्वत्सु प्रथितानि सन्ति । एतस्मादेव कारणात् प्रायः सर्वेषु पुराणेषु पञ्च लक्षणमेव समुल्लिखितमस्ति ।

सर्गश्च प्रचिसर्गश्च वंशो मन्वन्तराणि च ।
वंशानुचरितं चैव पुराणं पञ्चलक्षणम् ।। [1]

अत्र सर्गशब्दस्यार्थः सृष्टिरिति विज्ञेयः । प्रतिसर्गेण सम्पूर्णस्य जगतः संहारः परिकीर्तितः । देवर्षिराज्ञां च उत्पत्तिपरम्परा जगतः वंश शब्दतो निर्दिष्टास्ति । सृष्ट्यादीनां कालव्यवस्था मन्वन्तरमित्यभिधीयते । तत्तजन्वयजातानां देवर्षिराज्ञां वृत्तान्तानि वंशानुचरितानि पदेन कथितानि वर्तन्ते ।

**पुराणानां विभाजनम्**

पुराणसाहित्यस्य प्रायः महापुराणोपपुराणभेदात् सर्वत्र विविध विभाजनमुपलभ्यते ।

मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयम् ।
अनापलिङ्गकूस्कानि पुराणानि पृथक् पृथक् ।। [1]

अत्रास्य श्लोकस्याहभोहयमसि यत् मकाराद्याक्षरेण द्वे भकाराद्यक्षरेण द्वे, ब्रकाराद्याक्षरेण त्रीणि, वकाराद्यक्षरेण चत्वारि महापुराणानि बोधव्यानि तथा च अ -- ना --- प --- लि ---ग --- कू -- स्काद्याक्षरैः पृथत्त्वेनैनैकैके महापुराणं विजानीयात् ।

**पुराणेषु विष्णुपुराणम् -**

अष्टादश पुराणेषु विष्णुपुराणस्य स्थानं तृतीयम् । एतच्च भगवतो विष्णोः दक्षिणबाहुत्वेन स्वीक्रियते । मत्स्य पुराणानुकारं पुराणेञ्च श्लोकसंख्यामिमां समर्थयति । किन्तु तन्मते पुराणमिदं भागद्वयात्मकं पूर्वभागः उत्तरभागश्चेति । तत्र पूर्वभागे षडंशाः वर्तन्ते । ये तावत् शक्ति पुत्रेण पराशरेण मैत्रेयाय कथिताः सन्ति । उत्तरभागश्च तदन्तरं वर्तते । यत्र सूतः शौनकादिभिः प्रैरितः सन् विष्युधर्णोत्तरनामकाः नानाधर्मकथाः प्रोक्तवान् इति ।

विष्णुपुराणे -- प्रथमेऽशे --- 22 अध्यायाः ।
द्वितीयेऽशे --- 26 अध्यायाः ।
तृतीयेऽशे --- 27 अध्यायः ।
चतुर्थेऽशे --- 24 अध्यायाः ।
पञ्चमेऽशे ---- 36 अध्यायाः ।
षष्ठेंऽशे --- 07 अध्यायाः सन्ति ।

**वर्ण्यविषयाः**

अधुना उपलभ्यमानञ्च विष्णुपुराणस्य प्रथमेंऽशे विस्तरेण सृष्टेः वर्णनं वर्तते । द्वितीयेंऽशे भूगोलस्य वर्णनं तृतीये चतुर्णामाश्रमाणां चतुर्थे राजवंशवर्णनं पञ्चमे श्रीकृष्णस्य चरितं षष्ठे कलियुगस्वरूपम्, प्रायश्चित्त विधानम्, योगमायनिरूपणम्, ज्ञानेन सह भक्तेः सामञ्जस्य प्रतिपादनं चेति विषयाः सम्यक् वर्णिताः सन्ति । अत्र विष्णुपुराणे भगवतो विष्णोः सामप्रदायिक संकीर्णतां विस्मृत्य श्रद्धया सह पुराणखायास्य मतं स्वीकुर्वन्ति । अतः पुराणस्यास्य मुख्यवर्ण्यविषयोऽस्ति विष्णोः उपासना भक्तिर्वा । भक्तिद्वारा स्वाभाविकतया साधकस्य मनः भगवद्वुन्मुखं जायते । नवथा भक्तेः विस्तृत प्रति पादनं पुराणस्यास्य वैशिष्ट्यमस्ति । भगवतः विष्णोः नाम -- गुण -- लीलादि स्मरणस्य माहात्म्यं पराशरेण प्रदर्शितं यत् विष्णुस्मरणेन समस्तपापराशिः भस्मसाद्भवति । मोक्षश्च अनायासेन प्राप्यते ।

किन्तु स्वर्गप्राप्तिः तत्र विघ्नरूपानुमीयते ।
विष्णु संस्मरणा तद्यक्षीण समस्त केश संशयः ।
मुक्तिं प्रयाति स्वर्गाप्तिस्तस्य विघ्नोऽनुमीयते ।। [1]

न केवलं विष्णोः स्मरणं अपि तु तद्यशोगुणादीनां श्रवणं, कीर्तनं,

कृतस्य कर्मणः तत् समर्पणं च अत्यावश्यकमिति मत्वा पुराणेऽस्मिन् त्याग -- संयम - साधनादीनां महत्वपूर्णं चित्रणं कृतं वर्तते । एतेषां त्यागादीनां दुष्टान्तरूपेण ध्रुव प्रह्लाद -- सगर -- भगीरथ - नहुष -- ययाति -- जमदग्नि -- विश्वामित्र – केशिध्वजादीनां चरितं समुपन्यस्तमस्ति । सर्वेषु चरितेषु प्रह्लादचरितम् अत्र भक्तिकससवितितया समुपस्थापितं वर्तते । एतच्चरितमाध्यमेन भक्तेः सुमहात्म्यं प्रकाशितम् । भगवतश्च भक्तिप्रियत्वं प्रतिपादितमस्ति ।

**कलिधर्मनिरूपणम्**

विष्मुपुराणे षष्ठेऽशे प्रथमोध्याये मैत्रेयाय पराशर महर्णिणा कृत कलिधर्मनिरूपणं विद्रीयते -- कलियुगे मनुष्याणां प्रवृत्तिः न भवति। दाम्पत्यजीवनं यज्ञयागादि कर्मण्यापि च समीचीनरूपेण प्रचलन्ति ।

विवाह न कलौ धर्म्या न शिष्यगुरु संस्थितिः ।
न दाम्पत्यक्रमो नैव वह्निर्दिवात्मकः क्रमः ।। [1]

कलियुगे यः बलवान् सैव नीचकुलोद्भवो सन्नपि सर्वेषां स्वामीरूपेण विराजते । कलियुगे यस्य कस्यापि जनस्य मुखात् यत्किमपि वाक्यं निस्सरति तदेव प्रमाणमित्यङ्गीक्रियन्ते । कलियुगे सर्वे क्षुद्रदेवाः प्रमुखदेवतारूपेण पूज्यन्ते । उपवासाः तीर्थाटनं धनत्यागः इत्यादि कार्याण्येव तपोरूपेण स्वीक्रियन्ते । स्वचित्तानुसारिण क्रियमाण-कार्यमेव धर्मः इति कथ्यन्ते । मदगर्वो जायते । स्वकेशानुगुणेनैव स्त्रियः स्वलावण्यालङ्कारं क्रियन्ते । निर्धनः पतिः सर्वथा त्याज्य एवा धनवानेव पतित्वेनाङ्गीक्रियन्ते । अधिकधनदानमात्रेणैव स्वामीति कथ्यन्ते । न तत्र कुलस्य विषयः । गृहकार्येष्वेव धनं सर्वं व्ययीक्रियन्ते । अपि तु सर्वदा धनार्जने एव रताः भवन्ति । न तु आत्मज्ञानार्जने । अतः अतिथिं सत्कारः प्रायः न स्यात् ।

गुहान्ता द्रव्यसङ्घाता द्रव्यान्ता च तथामतिः ।
अर्थाश्चात्मोप भोग्यान्ता भविष्यन्ति कलौयुगे ।। [1]

स्त्रियस्तु सुन्दरपुरुषकामुकाः स्वेच्छाचारिणीव भ्रमन्ति । पुरषाः अक्रममार्गे धनार्जने इच्छुकाः भवन्ति । शूद्राः अपि ब्राह्मणैस्सह सञ्चरन्ति । क्षीरसमाप्यनन्तरं गाः हनन्ति । अन्नावृष्टिकारणात् सर्वे जनाः भयभीताः सन्तः बुभुक्षया पीडितः तपस्विजनाः इव कन्दान् फलानि भक्ष्यन्ते । अनावृष्टिकारणात् आत्महत्यार्थं प्रयत्नन्ते । कलियुगे असमर्थाः सर्वदा आनन्देन जीवनं यापयन्ति । कलिसङक्रमण काले विना स्नानेन भोजनं कुर्वन्ति । अग्नि -- देवता अतिथीनां पूजां न कुर्वन्त्येव । पितृ-देवतेभ्यः श्राद्धादि कार्याण्यपि सम्यक् न निर्वहन्ति । गुरूणां सम्मानं प्रायः न भवत्येव । कलियुगे स्त्रियः क्षुद्रस्वभावयुक्ताः शारीरिक संस्कार रहिताः अपवित्राः असत्यवादिनः भवन्ति ।

स्वपोषणपराः क्षुद्राः देहसंस्कार वर्जिताः ।
परुषानृत भाषिण्यो भविष्यन्ति कलौस्त्रियः ।। [1]

ब्रह्मचारिणः वेदाध्ययनं विना कालं यापयन्ति । गृहस्थाः अपि विना अग्निहोत्रादिना सत्कर्मकार्याचरणेन सदाचारेण व्यर्थरूपेण कालं यापयन्ति । सन्यासिनः अपि ग्रामेष्वेव निवसन् मित्रैस्सह सत्सम्बन्धान् व्यवहरन्ति । कलियुगे राजानः प्रजा-रक्षणं विना करग्रहणे एव उत्सुकाः भवन्ति । धनवान् राजा इति दरिद्रः भृत्याः इति च विज्ञायते । कृषिकाराः वैश्यादि जनाः स्वकर्मणा विना अन्यकार्येषु निमग्नाः भवन्ति । शूद्रगणाः सन्यासिवेषं धृत्वा भिक्षा-वृत्तिमारभन्ति । जनानाम् आयुरपि न्यूनं भवति । बाल्यावस्थायामेव मरणं प्राप्यन्ते केचन द्वादश वर्षे केशाः फलिताः भवन्ति । विंशंति वर्षाणि एव आयुर्दायं भवति ।

पलितोद्भवश्च भविता तथा द्वादशवार्षिकाः ।
नातिजीवति वै कश्चित् कलौ वर्षाणि विंशतिः ।। [1]

कलियुगे जनाः मन्दबुद्धियुक्ताः व्यर्थचिह्नानि धृत्वा मरणात्यन्तिक समीपे निवसन्ति । महापुरुषाः यदि सन्दिग्धा भवन्ति तर्हि चिन्तनीयं कलियुगस्य आरम्भो जाता इति । कलिप्रभावेन मेघाः अत्यन्त न्यूनाः तथैव व्यवसाय क्षेत्राण्यपि अल्प फलदायिनः भवन्ति ।

कलि प्रभावेण धान्यमपि स्वल्पं भवति । दुग्धमपि न्यूनं भवेत् । श्वश्रूखशुरश्च गुरुरूपेण विराजते । शालाद्याः एव मित्रिणि रूपाणि आभान्ति । मातापितरौ त्यक्त्वा चित्तभ्रान्त्या सञ्चरन्ति । सर्वदा पाप-कर्मणि एव रताः भवन्ति । निर्लज्ज मनुष्याः सर्वदा दुःखगामिनः भवन्ति ।

वाङ्मनः कायजेंदोषरभिभूताः पुनः पुनः ।
नराः पापान्यनुदिन करिष्यन्त्यल्पमेथसः ।। 1

स्वाध्याय रहिते स्वाहारहिते संसारे धर्मः नश्यत्येव । परन्तु अत्र महान् विषयोऽयं भवति यत् किञ्चित् प्रयासेन एव बृहत्पुण्यं प्राप्तुं शक्यते कलियुगे ।

**उपसंहारः**

महापुराणेषु विष्णुपुराणम् अत्यन्तसुप्रसिद्धमस्ति । विष्णुमहापुराणे अनेके धार्मिक विषयाः उक्ताः तत्र कलिधर्मविषयाः महोन्नत रूपेण समुपवर्णिताः ।

**उपयुक्तग्रन्थसूती**

1. अष्टाध्यायी --------- पाणिनीमहर्षिः ।
2. कूर्मपुराणम् -------- वेदव्यासः ।
3. देवीभागवतम् ------ वेदव्यासः ।
4. विष्णुपुराणम् ----- वेदव्यासः ।

**संधर्व सूची**

1. कूर्मपुराणम्, श्लो --- 1, पृ --12
2. देवीभागवतम्, अध्या --- 1, श्लो ---3, पृ --2
3. विष्णुपुराणम्, 6—1--11
4. विष्णुपुराणम् --- 6—1--20
5. विष्णुपुराणम् --- 6 –1--30
6. विष्णुपुराणम् -- 6 –1—42
7. विष्णुपुराणम् --- 6 ---1---57